# Onkareshvara Mahatmyam

# ૐકારેશ્વરમહાત્મ્યમ્

## Document Information

Text title : Onkareshvara Mahatmyam

File name : OMkAreshvaramahAtmyam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 7| 2-21||

Latest update : June 18, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 18, 2023

*sanskritdocuments.org*

# ૐકારેશ્વરમહાત્મ્યમ્

પાર્વતી -
મહાદેવમહાનન્દકરુણામૃતસાગર ।
શ્રુતમુત્તમમાખ્યાનં મહાકાલગણસ્ય ચ ॥ ૨॥

કિં વાન્યત્ પ્રીતિજનકં ક્ષેત્રમસ્તિ મહેશ્વર ।
ક્ષેત્રાણાં ત્વં પતિઃ શમ્ભો વિશિષ્ટં વક્તુમર્હસિ ॥ ૩॥

ઈશ્વરઃ -
ક્ષેત્રમસ્ત્યેકમુત્કૃષ્ટમુત્ફુલ્લકમલાનને ।
ઓઙ્કારં નામ વિમલં કલિકલ્મષનાશનમ્ ॥ ૪॥

તત્ર શૈવવરા નિત્યં નિવસન્તિ સહસ્રશઃ ।
તે સર્વે મમ લિઙ્ગાર્ચાં કુર્વન્ત્યેવ પ્રતિક્ષણમ્ ॥ ૫॥

ભાસિતાભાસિતૈર્નિત્યં શાન્તા દાન્તા જિતેન્દ્રિયાઃ ।
રુદ્રાક્ષવરભૂષાઢ્યા ભાલાક્ષાન્યસ્તમાનસાઃ ॥ ૬॥

તત્રાસ્તિ સરિતાં શ્રેષ્ઠા લિઙ્ગસઙ્ગતરઙ્ગિતા ।
નર્મદા શર્મદા નિત્યં સ્નાનાત્પાનાવગાહનાત્ ॥ ૭॥

પાપૌઘસઙ્ઘભઙ્ગાઢ્યા વાતપોતસુશીતલા ।
તત્રાસ્તિ કુણ્ડમુત્કૃષ્ટમોઙ્કારાખ્યં શુચિસ્મિતે ॥ ૮॥

તત્કુણ્ડદર્શનાદેવ મલ્લોકે નિવસેચ્ચિરમ્ ।
તત્કુણ્ડોદકપાનેન હૃદિ લિઙ્ગં પ્રજાયતે ॥ ૯॥

ભાવાઃ પિબન્તિ તત્કુણ્ડજલં શીતં વિમુક્તયે ।
તૃપ્તિં પ્રયાન્તિ પિતરઃ તત્કુણ્ડજલતર્પિતાઃ ॥ ૧૦॥

સદા તત્કુણ્ડરક્ષાર્થં ગણાઃ સંસ્થાપિતા મયા ।
કુણ્ડધારપ્રભૃતયઃ શૂલમુદ્ગરપાણયઃ ॥ ૧૧॥

ગજેન્દ્રચર્મવસના મૃગેન્દ્રસમવિક્રમાઃ ।
હરીન્દ્રાનપિ તે હન્યુર્ગિરીન્દ્રસમવિગ્રહાહ ॥ ૧૨॥

ધનુઃશરકરાઃ સર્વે જટાશોભિતમસ્તકાઃ ।
અગ્નિરિત્યાદિભિર્મન્ત્રૈર્ભસ્મોદ્ધૂલિતવિગ્રહા ॥ ૧૩॥

સઙ્ગ્રામમુખરાઃ સર્વે ગણા મેદુરવિગ્રહાઃ ।
કદાચિદનનુજ્ઞાપ્ય તાન્ ગણાન્ મદદર્પિતઃ ॥ ૧૪॥

અપ્સરોભિઃ પરિવૃતો મરુતાં પતિરુદ્ધતઃ ।
આરુહ્યાભ્રમુનાથં તં ક્રીડિતું નર્મદાજલે ॥ ૧૫॥

સમાજગામ ત્વરિતઃ શચ્યા સાકં શિવે તદા ।
તદા તં ગણપાઃ ક્રુદ્ધાઃ સર્વે તે હ્યતિમન્યવઃ ॥ ૧૬॥

સગજં પાતયન્નબ્ધૌ શચ્યા સાકં સુરેશ્વરમ્ ।
સુરાંસ્તદા સવરુણાન્ બિભિદુઃ પવનાનલાન્ ॥ ૧૭॥

નિસ્ત્રિંશવરધારાભિઃ સુતીક્ષ્ણાગ્રૈઃ શિલીમુખૈઃ ।
મુદ્ગરૈર્બિભિદુશ્ચાન્યે સવાહાયુધભૂષણાન્ ॥ ૧૮॥

વિવાહનાંસ્તદા દેવાન્ સ્રવદ્રક્તાન્ સ્ખલત્પદાન્ ।
કાન્દિશીકાન્ મુક્તકેશાન્ ક્ષણાચ્ચક્રુર્ગણેશ્વરાઃ ॥ ૧૯॥

અપ્સરાસ્તા વિકન્નરાઃ રુદન્ત્યો મુક્તમૂર્ધજાઃ ।
હાહા બતેતિ ક્રન્દન્ત્યઃ સ્રવદ્રક્તાર્દ્રવાસસઃ ॥ ૨૦॥

તથા દેવગણાઃ સર્વે શક્રાદ્યા ભયકમ્પિતાઃ ।
ઓઙ્કારં તત્ર તલ્લિઙ્ગં શરણં જગ્મુરીશ્વરમ્ ॥ ૨૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપાર્વતીસંવાદે ઓઙ્કારેશ્વરમહાત્મ્યમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભર્ગાખ્યઃ પઞ્ચમાંશઃ । અધ્યાયઃ ૭। ૨-૨૧॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 7. 2-21..

Notes:
Shiva describes to Parvati, the glory of Omkareshwara Jyotirlinga situated at the banks of River Narmada.

The shloka numbers are same as in the referenced text.

Proofread by Ruma Dewan

*Onkareshvara Mahatmyam*

pdf was typeset on June 18, 2023

Please send corrections to *sanskrit@cheerful.com*